# shrIjayendrasarasvatI aShTottarashatanAmAvaliH

# શ્રીજયેન્દ્રસરસ્વતી અષ્ટોત્તરશતનામાવલિઃ

## Document Information

Text title : shrIjayendrasarasvatI aShTottarashatanAmAvaliH

File name : jayendra108.itx

Category : aShTottarashatanAmAvalI, deities_misc, gurudev, nAmAvalI

Location : doc_deities_misc

Transliterated by : Ravi Venkatraman sri.sadguru.puja at gmail.com

Proofread by : Ravi Venkatraman, Sunder Hattangadi, PSA Easwaran

Source : https://drive.google.com/file/d/0B6uAhaK8f6enM3NZc0F6ajR0LVE/edit

Latest update : August 3, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીજયેન્દ્રસરસ્વતી અષ્ટોત્તરશતનામાવલિઃ

॥ શ્રીગુરુનામાવલિઃ ॥

શ્રીકાઞ્ચીકામકોટિપીઠાધિપતિ જગદ્ગુરુ શ્રીજયેન્દ્રસરસ્વતી
શ્રીપાદાનામષ્ટોત્તરશતનામાવલિઃ ।

જયાખ્યયા પ્રસિદ્ધેન્દ્રસરસ્વત્યૈ નમો નમઃ ।
તમોઽપહગ્રામરત્ન સમ્ભૂતાય નમો નમઃ ।
મહાદેવ મહીદેવતનૂજાય નમો નમઃ ।
સરસ્વતીગર્ભશુક્તિમુક્તારત્નાય તે નમઃ ।
સુબ્રહ્મણ્યાભિધાનીતકૌમારાય નમો નમઃ । ૫
મધ્યાર્જુનગજારણ્યાધીતવેદાય તે નમઃ ।
સ્વવૃત્તપ્રણીતાશેષાધ્યાપકાય નમો નમઃ ।
તપોનિષ્ઠગુરુજ્ઞાતવૈભવાય નમો નમઃ ।
ગુર્વાજ્ઞાપાલનરતપિતૃદત્તાય તે નમઃ ।
જયાબ્દે સ્વીકૃતતુરીયાશ્રમાય નમો નમઃ । ૧૦
જયાખ્યયા સ્વગુરુણા દીક્ષિતાય નમઃ ।
બ્રહ્મચર્યાદેવ લબ્ધપ્રવ્રજ્યાય નમો નમઃ ।
સર્વતીર્થતટે લબ્ધચતુર્થાશ્રમિણે નમઃ ।
કાષાયવાસસ્સંવીતશરીરાય નમો નમઃ ।
વાક્યજ્ઞાચાર્યોપદિષ્ટમહાવાક્યાય તે નમઃ । ૧૫
નિત્યં ગુરુપદદ્વન્દ્વનતિશીલાય તે નમઃ ।
લીલયા વામહસ્તાગ્રધૃતદણ્ડાય તે નમઃ ।
ભક્તોપહૃતબિલ્વાદિમાલાધર્ત્રે નમો નમઃ ।
જમ્બીરતુલસીમાલાભૂષિતાય નમો નમઃ ।
કામકોટિમહાપીઠાધીશ્વરાય નમો નમઃ । ૨૦
સુવૃત્તનૃહૃદાકાશનિવાસાય નમો નમઃ ।
પાદાનતજનક્ષેમસાધકાય નમો નમઃ ।

જ્ઞાનદાનોક્તમધુરભાષણાય નમો નમઃ ।
ગુરુપ્રિયા બ્રહ્મસૂત્રવૃત્તિકર્ત્રે નમો નમઃ ।
જગદ્ગુરુવરિષ્ઠાય મહતે મહસે નમઃ । ૨૫
ભારતીયસદાચારપરિત્રાત્રે નમો નમઃ ।
મર્યાદોલ્લઙ્ઘિજનતાસુદૂરાય નમો નમઃ ।
સર્વત્ર સમભાવાપ્તસૌહૃદાય નમો નમઃ ।
વીક્ષાવિવશિતાશેષભાવુકાય નમો નમઃ ।
શ્રીકામકોટિપીઠાગ્ર્યનિકેતાય નમો નમઃ । ૩૦
કારુણ્યપૂરપૂર્ણાન્તઃકરણાય નમો નમઃ ।
શ્રીચન્દ્રશેખરચિત્તાબ્જાહ્લાદકાય નમો નમઃ ।
પૂરિતસ્વગુરૂત્તંસસઙ્કલ્પાય નમો નમઃ ।
ત્રિવારં ચન્દ્રમૌલીશપૂજકાય નમો નમઃ ।
કામાક્ષીધ્યાનસંલીનમાનસાય નમો નમઃ । ૩૫
સુનિર્મિતસ્વર્ણરથવાહિતામ્બાય તે નમઃ ।
પરિષ્કૃતાખિલાણ્ડેશીતાટઙ્કાય નમો નમઃ ।
રત્નભૂષિતનૃત્યેશહસ્તપાદાય તે નમઃ ।
વેઙ્કટાદ્રીશકરુણાઽઽપ્લાવિતાય નમો નમઃ ।
કાશ્યાં શ્રીકામકોટીશાલયકર્ત્રે નમો નમઃ । ૪૦
કામાક્ષ્યમ્બાલયસ્વર્ણચ્છાદકાય નમો નમઃ ।
કુમ્ભાભિષેકસન્દીપ્તાલયવ્રાતાય તે નમઃ ।
કાલટ્યાં શઙ્કરયશઃસ્તમ્ભકર્ત્રે નમો નમઃ ।
રાજરાજાખ્યચોલસ્ય સ્વર્ણમૌલિકૃતે નમઃ ।
ગોશાલાનિર્મિતિકૃતગોરક્ષાય નમો નમઃ । ૪૫
તીર્થેષુ ભગવત્પાદસ્મૃત્યાલયકૃતે નમઃ ।
સર્વત્ર શઙ્કરમઠનિર્વહિત્રે નમો નમઃ ।
વેદશાસ્ત્રાધીતિગુપ્તિદીક્ષિતાય નમો નમઃ ।
દેહલ્યાં સ્કન્દગિર્યાખ્યાલયકર્ત્રે નમો નમઃ ।
ભારતીયકલાચારપોષકાય નમો નમઃ । ૫૦
સ્તોત્રનીતિગ્રન્થપાઠરુચિદાય નમો નમઃ ।
યુક્ત્યા હરિહરાભેદદર્શયિત્રે નમો નમઃ ।
સ્વભ્યસ્તનિયમોન્નીતધ્યાનયોગાય તે નમઃ ।
પરધામ પરાકાશલીનચિત્તાય તે નમઃ ।

અનારતતપસ્યાપ્તદિવ્યશોભાય તે નમઃ । ૫૫
શમાદિષડ્ગુણયત સ્વચિત્તાય નમો નમઃ ।
સમસ્તભક્તજનતારક્ષકાય નમો નમઃ ।
સ્વશરીરપ્રભાધૂતહેમભાસે નમો નમઃ ।
અગ્નિતપ્તસ્વર્ણપટ્ટતુલ્યફાલાય તે નમઃ ।
વિભૂતિવિલસચ્છુભ્રલલાટાય નમો નમઃ । ૬૦
પરિવ્રાડ્ગણસંસેવ્યપદાબ્જાય નમો નમઃ ।
આર્તાર્તિશ્રવણાપોહરતચિત્તાય તે નમઃ ।
ગ્રામીણજનતાવૃત્તિકલ્પકાય નમો નમઃ ।
જનકલ્યાણરચનાચતુરાય નમો નમઃ ।
જનજાગરણાસક્તિદાયકાય નમો નમઃ । ૬૫
શઙ્કરોપજ્ઞસુપથસઞ્ચારાય નમો નમઃ ।
અદ્વૈતશાસ્ત્રરક્ષાયાં સુલગ્નાય નમો નમઃ ।
પ્રાચ્યપ્રતીચ્યવિજ્ઞાનયોજકાય નમો નમઃ ।
ગૈર્વાણવાણીસંરક્ષાધુરીણાય નમો નમઃ ।
ભગવત્પૂજ્યપાદાનામપરાકૃતયે નમઃ । ૭૦
સ્વપાદયાત્રયા પૂતભારતાય નમો નમઃ ।
નેપાલભૂપમહિતપદાબ્જાય નમો નમઃ ।
ચિન્તિતક્ષણસમ્પૂર્ણસઙ્કલ્પાય નમો નમઃ ।
યથાજ્ઞકર્મકૃદ્વર્ગોત્સાહકાય નમો નમઃ ।
મધુરાભાષણપ્રીતસ્વાશ્રિતાય નમો નમઃ । ૭૫
સર્વદા શુભમસ્ત્વિત્યાશંસકાય નમો નમઃ ।
ચિત્રીયમાણજનતાસન્દૃષ્ટાય નમો નમઃ ।
શરણાગતદીનાર્તપરિત્રાત્રે નમો નમઃ ।
સૌભાગ્યજનકાપાઙ્ગવીક્ષણાય નમો નમઃ ।
દુરવસ્થિતહૃત્તાપશામકાય નમો નમઃ । ૮૦
દુર્યોજ્યવિમતવ્રાતસમન્વયકૃતે નમઃ ।
નિરસ્તાલસ્યમોહાશાવિક્ષેપાય નમો નમઃ ।
અનુગન્તૃદુરાસાદ્યપદવેગાય તે નમઃ ।
અન્યૈરજ્ઞાતસઙ્કલ્પવિચિત્રાય નમો નમઃ ।
સદા હસન્મુખાબ્જાનીતાશેષશુચે નમઃ । ૮૫
નવષષ્ટિતમાચાર્યશઙ્કરાય નમો નમઃ ।

વિવિધાપ્તજનપ્રાર્થ્યસ્વગૃહાગતયે નમઃ ।
જૈત્રયાત્રાવ્યાજકૃષ્ટજનસ્વાન્તાય તે નમઃ ।
વસિષ્ઠધૌમ્યસદૃશદેશિકાય નમો નમઃ ।
અસકૃત્ક્ષેત્રતીર્થાદિયાત્રાતૃપ્તાય તે નમઃ । ૯૦
શ્રીચન્દ્રશેખરગુરોઃ એકશિષ્યાય તે નમઃ ।
ગુરોર્હૃદ્ગતસઙ્કલ્પક્રિયાન્વયકૃતે નમઃ ।
ગુરુવર્યકૃપાલબ્ધસમભાવાય તે નમઃ ।
યોગલિઙ્ગેન્દુમૌલીશપૂજકાય નમો નમઃ ।
વયોવૃદ્ધાનાથજનાશ્રયદાય નમો નમઃ । ૯૫
અવૃત્તિકોપદ્રુતાનાં વૃત્તિદાય નમો નમઃ ।
સ્વગુરૂપજ્ઞયા વિશ્વવિદ્યાલયકૃતે નમઃ ।
વિશ્વરાષ્ટ્રીયસદ્ગ્રન્થકોશાગારકૃતે નમઃ ।
વિદ્યાલયેષુ સદ્ધર્મબોધદાત્રે નમો નમઃ ।
દેવાલયેષ્વર્ચકાદિવૃત્તિદાત્રે નમો નમઃ । ૧૦૦
કૈલાસે ભગવત્પાદમૂર્તિસ્થાપકાય તે નમઃ ।
કૈલાસમાનસસરોયાત્રાપૂતહૃદે નમઃ ।
અસમે બાલસપ્તાદ્રિનાથાલયકૃતે નમઃ ।
શિષ્ટવેદાધ્યાપકાનાં માનયિત્રે નમો નમઃ ।
મહારુદ્રાતિરુદ્રાદિ તોષિતેશાય તે નમઃ । ૧૦૫
અસકૃચ્છતચણ્ડીભિરર્હિતામ્બાય તે નમઃ ।
દ્રવિડાગમગાતૃણાં ખ્યાપયિત્રે નમો નમઃ ।
શિષ્ટશઙ્કરવિજયસ્વર્ચ્યમાનપદે નમઃ । ૧૦૮

પરિત્યજ્ય મૌનં વટાધઃસ્થિતિં ચ
વ્રજન્ ભારતસ્ય પ્રદેશાત્પ્રદેશમ્ ।
મધુસ્યન્દિવાચા જનાન્ધર્મમાર્ગે
નયન્ શ્રીજયેન્દ્રો ગુરુર્ભાતિ ચિત્તે

॥ શ્રીગુરુ શ્રીચન્દ્રશેખરેન્દ્રસરસ્વતી શ્રીચરણસ્મૃતિઃ ॥

શ્રીજગદ્ગુરુ શ્રીકાઞ્ચીકામકોટિપીઠાધિપતિ શ્રીશઙ્કરાચાર્ય
શ્રીજયેન્દ્રસરસ્વતી શ્રીચરણૈઃ પ્રણીતા ।

અપારકરુણાસિન્ધું જ્ઞાનદં શાન્તરૂપિણમ્ ।
શ્રીચન્દ્રશેખરગુરું પ્રણમામિ મુદાન્વહમ્ ॥ ૧॥

લોકક્ષેમહિતાર્થાય ગુરુભિર્બહુસત્કૃતમ્ ।
સ્મૃત્વા સ્મૃત્વા નમામસ્તાન્ જન્મસાફલ્યહેતવે ॥ ૨॥

ગુરુવારસભાદ્વારા શાસ્ત્રસંરક્ષણં કૃતમ્ ।
અનૂરાધાસભાદ્વારા વેદસંરક્ષણં કૃતમ્ ॥ ૩॥

માર્ગશીર્ષે માસવરે સ્તોત્રપાઠપ્રચારણમ્ ।
વેદભાષ્યપ્રચારાર્થં રત્નોસવનિધિઃ કૃતઃ ॥ ૪॥

કર્મકાણ્ડપ્રચારાય વેદધર્મસભા કૃતા ।
વેદાન્તાર્થવિચારાય વિદ્યારણ્યનિધિઃ કૃતઃ ॥ ૫॥

શિલાલેખપ્રચારાર્થમુટ્ટઙ્કિત નિધિઃ કૃતઃ ।
ગોબ્રાહ્મણહિતાર્થાય વેદરક્ષણગોનિધિઃ ॥ ૬॥

ગોશાલા પાઠશાલા ચ ગુરુભિસ્તત્ર નિર્મિતે ।
બાલિકાનાં વિવાહાર્થં કન્યાદાનનિધિઃ કૃતઃ ॥ ૭॥

દેવાર્ચકાનાં સાહ્યાર્થં કચ્ચિમૂર્નિધિઃ કૃતઃ ।
બાલવૃદ્ધાતુરાણાં ચ વ્યવસ્થા પરિપાલને ॥ ૮॥

અનાથપ્રેતસંસ્કારાદશ્વમેધફલં ભવેત્ ।
ઇતિ વાક્યાનુસારેણ વ્યવસ્થા તત્ર કલ્પિતા ॥ ૯॥

યત્ર શ્રીભગવત્પાદૈઃ ક્ષેત્રપર્યટનં કૃતમ્ ।
તત્ર તેષાં સ્મારણાય શિલામૂર્તિનિવેશિતા ॥ ૧૦॥

ભક્તવાઞ્છાભિસિદ્ધ્યર્થં નામતારકલેખનમ્ ।
રાજતં ચ રથં કૃત્વા કામાક્ષ્યાઃ પરિવાહણમ્ ॥ ૧૧॥

કામાક્ષ્યમ્બાવિમાનસ્ય સ્વર્ણેનાવરણં કૃતમ્ ।
મૂલસ્યોત્સવકામાક્ષ્યાઃ સ્વર્ણવર્મ પરિષ્કૃતિઃ ॥ ૧૨॥

લલિતાનામસાહસ્રસ્વર્ણમાલાવિભૂષણમ્ ।
શ્રીદેવ્યાઃ પર્વકાલેષુ સુવર્ણરથચાલનમ્ ॥ ૧૩॥

ચિદમ્બરનટેશસ્ય સદ્વૈદૂર્યકિરીટકમ્ ।
કરેડભયપ્રદે પાદે કુઞ્ચિતે રત્નભૂષણમ્ ॥ ૧૪॥

મુષ્ટિતણ્ડુલદાનેન દરિદ્રાણાં ચ ભોજનમ્ ।
રુગ્ણાલયે ભગવતઃ પ્રસાદવિનિયોજનમ્ ॥ ૧૫॥

જગદ્ધિતૈષિભિર્દીનજનાવનપરાયણૈઃ ।
ગુરુભિશ્ચરિતે માર્ગે વિચરેમ મુદા સદા ॥ ૧૬॥

Encoded by
Ravi Venkatraman sri.sadguru.puja at gmail.com.
Proofread by
Ravi Venkatraman,
Sunder Hattangadi, and
PSA Easwaran

---

*shrIjayendrasarasvatI aShTottarashatanAmAvaliH*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*